लिङ्गानुशासनम्

LINGANUSHASHANAM

OR

PANINI ON GENDERS.

EDITED WITH A COMMENTARY

BY

TARANATHA TARKAVACHASPATI
Professor of Grammar, Govt. Sanskrit College.

Calcutta:
PRINTED AT THE KAVYAPRAKASHA PRESS.
1872

लिङ्गानुशासनम् ।

वागीश्वरीं हृदि ध्यात्वा श्रीतारानाथशर्म्मणा ।
व्याख्यायते पाणिनीयमेतल्लिङ्गानुशासनम् ॥
तत्र लिङ्गमित्यधिकृत्य पाणिनिनानुशिष्टम् ॥

स्त्री । १ ।

इत उत्तरं वक्ष्यमाणाः शब्दाः स्त्रीलिङ्गाः स्युरित्यधिकारः । तत्तदपवादस्तत्तत्स्थले वक्ष्यते तथा च विशेषैरबाधिता एव स्त्रीलिङ्गाः ।

ऋकारान्ता मातृदुहितृपितृस्वसृननान्दरः । २ ।

ऋकारान्ता अमी पञ्चैव स्त्रीलिङ्गा नान्ये। अन्येषाम् "ऋन्नेभ्यः" इति ङीब्विधानेन ईकारान्तत्वात् स्वस्रादेरेव ङीब्निषेधेन ऋदन्तत्वात्, तिसृचतसोस्तु स्त्रियामादेशतया प्रकृतिरूपत्वाभावेन ऋदन्तत्वेऽपि न नियमव्याघातः । माता दुहिता स्वसा यीता ननान्दा ।

अन्यूप्रत्ययान्तो धातुः । ३ ।

अनिप्रत्ययान्तः ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः सरणिः रजनिरित्यादि । तत्र च "कृदिकारादक्तिनः" इति पक्षे ङीप् अवनी रजनी चेत्यादि । चमूः वधूरित्यादि । प्रत्ययान्तः किम् ? दिव्यतेः क्विप् द्यूः अयं विशेष्यलिङ्गः ।

अशनिभरण्यरणयः पुंसि च । ४ ।

एते स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । अनिप्रत्ययान्ततया स्त्रीत्वे प्राप्ते पाक्षिकपुंस्त्वविधानार्थं सूत्रम् । इयमयं वा अशनिः भरणिः अरणिः । स्त्रीत्वपक्षे ङीप् वा अशनीत्यादि ।

मिन्यन्तः । ५ ।

धातुरित्यनुवर्त्तते । मिप्रत्ययान्तः निप्रयान्तश्च धातुः स्त्रियां स्यात् । भूमिः ग्लानिः ह्रानिः धुनिः । अत्रापि वा ङीप् भूमी ग्लानी ह्रानी धुनी इत्यादि ।

वह्निवृष्ण्यग्नयः पुंसि । ६ ।

निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते तदपवादार्थं सूत्रम् । अयं वह्निः वृष्णिः अग्निः ।

श्रोणियोन्यूर्मयः पुंसि च । ७ ।

एते शब्दाः स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । एतेषां यथायोग्यं मिन्यन्तत्वेन प्राप्तौ विकल्पः । अयमियं वा श्रोणिः योनिः ऊर्मिः । स्त्रीत्वपक्षे वा ङीप श्रोणी योनी ऊर्मी ।

क्तिन्नन्तः । ८ ।

क्तिन्प्रत्ययान्तो धातुः स्त्रियां स्यात् । कृतिः बुद्धिः दृष्टिः । "अक्तिनः" इति निर्देशात् अत्र न पक्षे ङीप् ।

ईकारान्तश्च । ९ ।

ईप्रत्ययान्तो धातुः स्त्रियां स्यात् । चकारो धात्वधिकारनिवृत्त्यर्थः । एतत्सूत्रपर्यन्त एव धातुरनुवर्त्तते नापिमसूत्रे । अवीः, तन्त्रीः, तरीः, लक्ष्मीः ।

ऊङाबन्तञ्च । १० ।

ङीब्ङीष्ङीनां ग्रहणाय ङीग्रहणं टाप्चापोर्ग्रहणायापो ग्रहणम् । ऊङन्तः ङ्यन्तः आबन्तश्च शब्दः स्त्रीलिङ्गः स्यात् । ऊङादीनां स्त्रियां विहितत्वेऽपि एकत्र सर्वेषां ग्रहणे लिङ्गज्ञानस्य सुगमतार्थमिह ग्रहणम् । एवमन्यत्रापि । ऊङ् । कुरूः कर्कन्धूः ङी । कर्त्री गौरी ब्राह्मणी । आप् विद्या भिदा त्वरा जरा इत्यादि ।

यून्तमेकाक्षरम् । ११ ।

एकाक्षरः ईकारान्तः ऊकारन्तश्च असति विशेषे स्त्रीलिङ्गः स्यात् । श्रीः भूः । दीव्यतेः क्विपि तु विशेषलिङ्गता । एकाक्षरं किम् ? बहुव्रीहौ पृथुश्रीः प्राप्तभूः विशेष्यलिङ्ग एव ।

विंशत्यादिरा नवतेः । १२ ।

विंशतिप्रभृतयः नवतिपर्य्यन्ताः संख्यासंख्येयवाचकाः स्त्रियां स्युः । इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः । इदिकारान्तत्वाभावात् विंशत्यादिभ्यो न पक्षे ङीप् । एकविंशत्यादेस्तु "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति स्त्रीत्वमेव एकनवत्यादेः नवतिलिङ्गानतिवृत्तेर्नावधित्वव्याघातः । आ नवतेः किं ? शतं सहस्रम् । विंशत्यादयः किम् ? एकादशादेर्विशेष्यलिङ्गत्वम् ।

दुन्दुभिरक्षेषु । १३ ।

अक्षार्थको दुन्दुभिशब्दः स्त्रीलिङ्गः स्यात् । इयं दुन्दुभिः पक्षे ङीप् दुन्दुभी । अक्षादन्यत्र न स्त्रीत्वम् किन्तु पुंस्त्वम् ।

नाभिरक्षत्रिये । १४ ।

क्षत्रियार्थकभिन्नो नाभिशब्दः स्त्रीलिङ्गः स्यात् । इयं नाभिः (अङ्गावयवः) वा ङीप् नाभी ।

उभावन्यत्र पुंसि ।१५।

उभौ दुन्दुभिनाभिशब्दौ क्रमेण नाभिभिन्ने चत्त्रिये च वर्त्तमानौ पुंलिङ्गौ स्याताम् । अयं दुन्दुभिः (वाद्यभेदः असुरभेदो वा) अयं नाभिः (चत्त्रियः) "लिङ्गमशिष्यं लोकाश्रयत्वात्" इत्युक्तेः क्वचित् व्यभिचारः । तेन अवयववाचकस्य पुंस्त्वमपि "समुल्लसत्पङ्कजपत्त्र-कोमलैरुपाहितश्रीण्युपनीविनाभिभिः" इत्यत्र पुंस्त्वम् । अत एव रभसः

सुरूरराट् चत्त्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे ॥

इत्याह स्म ।

तलन्तः ।१६।

भावाद्यर्थे विहिततलप्रत्ययान्तः स्त्रीलिङ्गः स्यात् । शुभ्रस्य भावः शुभ्रता एवं जड़ता मृदुता । ब्राह्मणस्य कर्म्म भावो वा ब्राह्मणता । जनानां समूहः जनता ग्रामता । देव एव देवता "स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इत्युक्तेः प्रकृतिभिन्नलिङ्गत्वम् ।

भूमिविद्युत्सरिल्लतावनिताभिधानानि ।१७।

भूम्यादिपर्य्यायशब्दाः स्त्रीलिङ्गाः स्युः । अचला अनन्ता विश्वम्भरा इत्यादयः । विद्युत् तड़ित् सौदामनी चपला चञ्चला । सरित् निम्नगा आपगा । लता वल्ली वल्लरी व्रततिः । वनिता योषित् अबला ।

यादो नपुंसकम् ।१८।

यादःशब्दः सरिद्वाचकोऽपि क्लीवलिङ्गः स्यात् । पूर्व्वसूत्रापवादः । इदं यादः (नदी) ।

भास्स्रुक्स्रग्दिग्दृगुष्णिगुपानहः ।१९।

एते स्त्रियां स्युः । इयं भाः स्रुक् स्रक् दिक् दृक् उष्णिक् उपानत् ।

स्थूणोर्णे नपुंसके च। २०।

स्थूणोर्णाशब्दौ स्त्रियां नपुंसके च स्तः। स्थूणा स्थूणम् (काष्ठमयी द्विकर्णिका)। ऊर्णा ऊर्णम् (मेषादिलोम)।

गृहशशाभ्यां क्लीबे। २१।

गृहपूर्व्वकः स्थूणाशब्दः शशपूर्व्वकश्च ऊर्णाशब्दः क्लीबलिङ्ग एव स्यात् न तु स्त्रियाम्। परवल्लिङ्गतापवादः। गृहस्थूणम् शशोर्णम्।

प्रावृड्विप्रुड्रुड्विट्त्विषः। २२।

एते शब्दाः स्त्रियां स्युः। इयं प्रावृट् विप्रुट् रुट् विट् त्विट्।

दर्व्विविदिवेदिखनिशाण्यश्रिवेश्यिकृष्योषध्यङ्गुलयः। २३।

एते शब्दाः स्त्रीलिङ्गाः स्युः। पक्षे ङीप्। इयं दर्व्विः विदिः वेदिः खनिः शाणिः अश्रिः वेशिः कृषिः ओषधिः अङ्गुलिः। पक्षे ङीप् सर्वत्र, दर्वीकरः, "अङ्गुलीवोरगक्षता" इति कालिदासः।

तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः। २४।

एते स्त्रीलिङ्गाः स्युः। इयं तिथिः। अस्य पुंस्त्वमपि "तिथयो-र्द्वयोः" इत्यमरोक्तेः। "निखिलान्निशि पूर्णिमातिथीन्" इति नैषधम् नाडिः रुचिः इत्यादि। रात्र्यादय इत्यादिपदात् नक्तंदोषाभिन्ना रात्रिपर्य्याया गृह्यन्ते। सर्व्वत्र पक्षे ङीप्। नाडी रुची वीची इत्यादि।

शष्कुलिराजिकुट्यवन्तिवर्त्तिभ्रुकुटित्रुटिवलिपङ्क्तयः। २५।

एते शब्दाः स्त्रियां स्युः। इयं शष्कुलिः राजिः इत्यादि। सर्व्वेभ्यः

पक्षे ङीप्। "अवलम्बितकर्णशष्कुलीकलसीकम्" इति नैषधम्। "राजीवराजीवशलोलभृङ्गम्" इति माघः। वलिः (उदरावयवः)।

प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुद्युन्मुत्समिधः। २६।

एते शब्दाः स्त्रियां स्युः। इयं प्रतिपत् आपत् विपत् इत्यादि। उषाः प्रातरधिष्ठात्री देवता "उषा उशन्ति" इति वेदमन्त्रः।

आशीर्धूःपूर्गीर्द्वारः। २७।

एते स्त्रियां स्युः। इयमाशीः धूः पूः गीः द्वाः।

अप्सुमनस्समासिकतावर्षाणां बहुत्वञ्च।

अप्प्रभृतीनां पञ्चानां स्त्रीत्वं बहुवचनान्तत्वं च स्यात्। इमा आपः। इमाः सुमनसः। पुष्पसामान्यवाचित्व एवास्य बहुत्वं तेन सुमना मालती जातिरित्यादौ एकत्वम्। देववाचकस्य तु पुंस्त्वमेव। बहुत्वं चैषां प्रायिकम् अत एव अर्थवत्सूत्रभाष्ये, "एका च सिकता तैलदानेऽसमर्था" इति प्रयुक्तम्। "समां समां विजायते" इति सूत्रभाष्ये समायां समायामिति प्रयुक्तम्। "विभाषा पाशाघेट्" इति सूत्रवृत्तिव्याख्यायाम् आघ्रासातां सुमनसाविति हरदत्तेन च प्रयुक्तम्।

शुक्त्वग्ज्योग्वाग्यवागूनौस्फिचः। २९।

एते शब्दाः स्त्रियां स्युः। इयं शुक् त्वक् ज्योक् वाक्।

तटिसीमासंबध्याः। ३०।

एते शब्दाः स्त्रियां स्युः। तटिः पक्षे ङीप् सीमा संबध्या।

चूल्लिवेणिखार्य्यश्च । ३१ ।

एते शब्दाः स्त्रियां स्युः । इयं चूल्लिः वेणिः खारिः पक्षे ङीप् ।

ताराधाराज्योत्स्नादयश्च । ३२ ।

एते शब्दाः स्त्रियां स्युः । तारा धारा ज्योत्स्ना ।

शलाका स्त्रियां नित्यम् । ३३ ।

शलाकाशब्दो नित्यस्त्रीलिङ्गः । इयं शलाका ।

स्त्रीत्यधिकारे पुनः स्त्रीग्रहणमधिकारनिवृत्त्यर्थम् । नित्य-ग्रहणमन्येषां व्यभिचारसूचनार्थम् । यत्र यत्र च व्यभिचारः तत्तत् पूर्व्वमुक्तम् ।

अत्र सूत्रपाठाद्यनुसारेण किञ्चिदवशिष्टं मुच्यते । स्त्रियां क्तिन् (३,३,९४) इत्यधिकारे ये विहिताः क्यबादयः प्रत्ययास्तदन्ता अपि स्त्रियां स्युः । यथा व्रजयजोर्भावे क्यप् (३,३,९८ सू०) व्रज्या इज्या । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्-भृञिणः (३,३,९९) । समज्या सभा, निषद्या आपणः, निपत्या पिच्छिला भूमिः, मन्या गलपार्श्वशिरा, विद्या, सुत्या अभिषवः, शय्या, भृत्या, इत्या शिविका । कृञः श च (३,३,१००) क्रिया कृत्या । इच्छा (३,३,१०१) इच्छा । परिचर्य्यापरिसर्य्या-मृगयाटाट्यानामुपसंख्यानमिति तत्रत्यवार्त्तिकम् । परिचर्य्या पूजा, परिसर्य्या, मृगया, अटाट्या । जागर्त्तेरकारो वा (वा०) जागरा जागर्य्या । अ प्रत्ययात् (३,३,१०२, सू०) जिगमिषा विविदिषा पुत्रकाम्या । गुरोश्च हलः (३,३,१०३, सू०) ईहा ऊहा, मूर्च्छा । षिद्भिदादिभ्योऽङ् (३,३,१०४, सू०) जरा त्रपा लज्जा भिदा छिदा । चिन्तिपूजिकथिकुम्बिचर्चश्च

(३,३,१०५, सू०) चिन्ता पूजा कथा कुम्बा चर्चा। आतश्चोपसर्गे (३,३,१०६) उपधा उपमा, उपदा। अदन्तरोरुपसंख्यानम् (वा०) श्रद्धा अन्तर्द्धा। ण्यासश्रन्थो युच् (३,३,१०७, सू०) कारणा यातना पीडना आसना श्रन्थना। घट्टिवन्दिविदिभ्यश्च (वा०) घट्टना वन्दना वेदना। इषेरनिच्छार्थस्य (वा०) अन्वेषणा। परेर्वा (वा०) पर्य्येषणा। रोगाख्यायां ण्वुल् बहुलम् (३,३,१०८) प्रच्छर्दिका प्रवाहिका विचर्चिका। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः (वा०) आसिका शायिका। संज्ञायाम् (३,३,१०९) उद्दालपुष्पभञ्जिका। विभाषाख्यानपरिप्रश्नयोरिञ् च (३,३,११०) कां कारिं कारिकां क्रियां कृत्यां कृतिं वा त्वमकार्षीरिति प्रश्ने सर्वां कारिं कारिकां वाऽकार्षमित्युत्तरम् एवं गणिं गणिकां गणनाम्। पाचिं पाचिकां पचां पक्तिम्। पर्य्यायार्हर्णोत्पत्तिषु ण्वुच् (३,३,१११) भवत आसिका पर्य्यायेणासना, अर्हे भवानिक्षुभक्षिकामर्हति। ऋणे इक्षुभक्षिकां मे धारयसि। उत्पत्तौ इक्षुभक्षिका उदपादि। आक्रोशे नञ्यनिः (३,३,११२) अजीवनिस्तव भूयादिति। अनिप्रत्ययान्ततया एतस्य प्राप्तावपि स्त्र्यधिकारपतितयोऽत्रोक्तिः। कर्म्मव्यतिहारे णच् स्त्रियाम् (३,३,४३) इति णचि "णचः स्त्रियामञ्" इति (५,४,१४) स्वार्थिकेऽञि व्यावक्रोशी व्यात्युक्षी।

तलन्त इति (१७) सूत्रे तल्ग्रहणं समूहार्थयादीनामुपलक्षणम् अत एव "तलन्ते येनिकट्यता वैरमैथुनकादिवुः" इत्यमर आह स्म। तस्य समूहः (४,२,३७) इत्यधिकारे पाशादिभ्यो यः (४,२,४९) इति ये पाश्या वन्या वात्या धम्या तृण्या। खलगोरथात् (४,२,५० सू०) खल्या गव्या रथ्या। इनित्रक-

ष्यचश्च (४,२,५१, सू०) खलादिभ्य इनिर्वक्तव्यः (वा०) खलिनी डाकिनी कुटिम्बिनी। गोत्रा, रथकड्या। इग्द्वाद्वन् वैरमैथुनिकयोः (४,३,१२५) वैरे काकोलूकिका। मैथुने अत्रिभारद्वाजिका, आदिना "पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्चेति" दण्डव्यवसर्गयोश्चेति (५,१,२७,२८) वुनो ग्रहणम् द्विपादिकां ददाति दण्डितो द्वौ द्वौ पादौ ददातीत्यर्थः। द्विशतिकां त्यजति। वुग्रहणात् वुञोऽपि ग्रहणम् तेन "गोत्रचरणात् श्लाघात्याकारेत्यादि (५,१,१३४) वुञो ग्रहणम् गार्गिकया काठिकया वा श्लाघते। द्वन्द्वमनोज्ञादिभ्यश्चेति (५,१,११३) वुञश्च ग्रहणम्। शैष्योपाध्यायिका मानोज्ञिका। तदस्यां प्रहरणमिति क्रीडायां णः (४,२,५७) इति णान्तोऽपि स्त्रियाम्। दण्डः प्रहरणमस्यां क्रीडायाम् दाण्डा मौसला। घञः साऽस्यां क्रियेति ञः (४,२,५८) इति विहितञान्तस्य स्त्रियां स्यात्। दाण्डपाता तिथिः। श्यैनम्पाता मृगया, तैलम्पाता स्वधा।

एतद्भिन्ना अन्येऽपि केचन, शब्दाः स्त्रीलिङ्गतयाऽमरेऽभिहिताः यथा तिन्दुकी कणिका, भङ्गिः सुरङ्गा सूचिः माविः काकिनी (णी) चूर्णिः, शाणी द्रूणिः दरत्। कन्था आसन्दी (व्रतिनामुपवेशनासनम्) झल्लरी चर्चरी, पारी होरा लट्वा सिध्मला लाचा लिचा गण्डूषा, स्थपुटी चमसी मसी। इत्यादयः

इति स्त्रीलिङ्गानुशासनम्।

पुमान् । १ ।

वक्ष्यमाणाः शब्दाः असति बाधके पुंलिङ्गाः स्युः ।

घञबन्तः । २ ।

घञन्तः अबन्तश्च धातुः पुंलिङ्गः स्यात् । घञ्—पाकः त्यागः । अप्—करः गरः तरः शरः । घञादयो भावार्थका एवेह गृह्यन्ते । भावे विहिताभ्यां क्तल्युड्भ्यां नपुंसकत्वस्य, क्तिन्नादिभिश्च स्त्रीत्वस्य बाधनात् तद्बाध्यतया भावार्थकतैवोचिता । तेन कर्म्मादौ घञाद्यन्ता विशेष्यलिङ्गा एव । अत एव भाष्यकारेण सम्बन्धमनुवर्त्तिष्यते इति सम्बन्धशब्दस्य कर्म्मार्थकत्वेन नपुंसकतया प्रयोगः कृतः ।

घाजन्तश्च । ३ ।

घान्तः अच्प्रत्ययान्तश्च धातुः पुंसि स्यात् । विस्तरः गोचरः चयः जयः नय इत्यादि ।

भयलिङ्गभगपदानि नपुंसके । ४ ।

अजाद्यन्तत्वेन पुंस्त्वे प्राप्ते अपवादार्थं सूत्रम् । एते शब्दा नपुंसकलिङ्गाः स्युः । इदं भयं लिङ्गं भगं पदम् ।

नङन्तः । ५ ।

नङ्प्रत्ययान्तः शब्दः पुंसि स्यात् । यत्नः प्रश्नः इत्यादि ।

याच्ञा स्त्रियाम् । ६ ।

नङ्प्रत्ययान्तत्वेन पुंस्त्वे प्राप्तेऽपवादोऽयम् । याच्ञाशब्दः स्त्रियां स्यात् । इयं याच्ञा ।

क्यन्तो घुः। ७।

किप्रत्ययान्तो घुः (दा धा) पुंसि स्यात्। आधिः उदधिः (घटः)। व्याधिः निधिः। घुः किं चक्रिः जक्षिः विशेष्यलिङ्ग एव।

इषुधिः स्त्री च। ८।

क्यन्तत्वेन पुंस्त्वे प्राप्ते वा स्त्रीत्वार्थं सूत्रम्। इयमयं वा इषुधिः।

देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि। ९।

देवादिपर्य्यायशब्दाः यथासम्भवं तद्भेदवाचिनश्च असति बाधके पुंलिङ्गाः स्युः। देवाः सुराः। भेदाः ब्रह्मा विष्णुः शिवः शक्रः। असुराः दनुजाः। भेदाः बलिः कालकेयः नेमिः। आत्मा क्षेत्रज्ञः। स्वर्गः नाकः। गिरिः नगः पर्व्वतः। भेदाः हिमालयः सुमेरुः। समुद्रः उदन्वान् सिन्धुः। भेदाः क्षीरोदः लवणोदः। नखः नखरः करजः। केशः कचः वालः। दन्तः दशनः। स्तनः कुचः पयोधरः। भुजः प्रकोष्ठः। कण्ठः गलः। खड्गः असिः। शरः सायकः मार्गणः। पङ्कः कर्द्दमः।

त्रिपिष्टपं त्रिभुवने नपुंसके। १०।

तृतीयभुवनवाचकत्रिपिष्टपशब्दः क्लीबे स्यात्। स्वर्गवाचित्वेन पुंस्त्वे प्राप्ते अयमारम्भः। इदं त्रिपिष्टपम् (स्वर्गः)।

द्यौः स्त्रियाम्। ११।

द्योदिवोस्तन्त्रेण ग्रहणम्। स्वर्गाभिधायित्वेन पुंस्त्वे प्राप्तेऽयमारम्भः। द्योशब्दः दिव्शब्दश्च स्त्रियां स्यात्। इयं द्यौः इमे भूदिवौ।

इषुबाहू स्त्रियाञ्च । १२ ।

इषुबाहुशब्दौ पुंसि स्त्रियाञ्च स्याताम् । शरवाचित्वेन भुजवाचित्वेन पुंस्त्वे प्राप्ते पक्षे स्त्रीत्वविधानार्थमारम्भः । इयमयं वा इषुः बाहुः ।

बाणकाण्डौ नपुंसके च । १३ ।

एतौ पुंसि नपुंसके च स्याताम् । शरवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीवत्वार्थमारम्भः । अयमिदं वा बाणः बाणं काण्डः काण्डम् ।

नन्तः । १४ ।

न् इत्येतदन्तः पुंसि स्यात् । श्वा तक्षा इषा उक्षा । चर्म्मवर्म्मादयस्तु "मन् द्व्यच्कोऽकर्त्तरि" इति परसूत्रेणास्य बाधात् क्लीवलिङ्गाः । तत्र "द्व्यच्कः" इत्युक्तेः पृथिमा म्रदिमा इत्यादयो नन्तत्वेन पुंस्येव ।

क्रतुपुरुषकपोलगुल्फमेघाभिधानानि । १५ ।

क्रत्वादिपर्य्यायशब्दाः यथासम्भवं तद्विशेषशब्दाश्च पुंसि स्युः । क्रतुः अध्वरः । भेदः उक्थः अग्निष्टोमः । पुरुषः नरः । कपोलः गण्डः । गुल्फः प्रपदः । मेघः नीरदः जलधरः । भेदः पुष्करः आवर्त्तकः ।

अभ्रं नपुंसकम् । १६ ।

मेघवाचित्वेन पुंस्त्वे प्राप्ते तदपवादः । अभ्रम् ।

उकारान्तः । १७ ।

उकारान्तः शब्दः पुंसि स्यात् । विभुः विधुः इक्षुः । इदञ्च विशेषैरबाधितविषयम् । अत एव "हनुर्हट्टविला-

स्त्रियां न्वत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयवे" इति मेदिनिः। "करेणुरिभ्यां स्त्री नेभे" इत्यमरः। तथा च एवं-जातीयकविशेषाभाव एव सूत्रं प्रवर्त्तते एतदभिप्रायेण "लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इत्युक्तममरसिंहेन। एवमन्यत्रापि।

धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्।१८।

उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम्। एते शब्दाः स्त्रियां स्युः। धेनुः रज्जुः कुहूः। अत्र अप्राणिजातित्वात् पक्षे ऊङ्। कुहूः सरयूः तनूः रेणूः प्रियङ्गूः। धेनोः प्राणित्वात् रज्जोश्च पर्य्युदासान्नोङ्।

समासे रज्जुः पुंसि च।१९।

समासान्तस्थः रज्जुशब्दः पुंसि, चात् स्त्रियाम्। कर्कशरज्ज्वा कर्कशरज्जुना वा बध्नाति।

श्मश्रुजानुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके।२०।

उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादाय सूत्रम्। एतानि क्लीबे स्युः। श्मश्रु जानु स्वादु अश्रु जतु त्रपु तालु।

वसु चार्थवाचि।२१।

अर्थवाचिवसुशब्दः क्लीबे स्यात्। वसु धनम्। अर्थवाचीत्युक्तेः वसुर्मयूखाग्निधनाधिपेषु देवभेदे च पुमान्।

मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च।२२।

एते शब्दाः पुंसि नपुंसके च स्युः। पुंस्त्वे प्राप्ते पक्षे क्लीव-त्वार्थं सूत्रम्। अयं मद्गुः इदं वा मद्गु मधुः मधु।

व्यवस्थितविकल्पाश्रयणेन वसन्ते चैत्रे दैत्यभेदे च पुमानेव चौद्र-वाचि तु नपुंसकमेव ।

रुत्वन्तः । २३ ।

रुकारान्तः तुकारान्तश्च पुंसि स्यात् । उकारान्तत्वेनैव प्राप्ते प्रपञ्चार्थः । मेरुः सेतुः हेतुः ।

दारुकसेरुजतुवस्तुमस्तूनि नपुंसके । २४ ।

पूर्व्वसूत्रापवादः । एते शब्दाः क्लीबे स्युः । दारु कसेरु जतु वस्तु मस्तु ।

सक्तुर्नपुंसके च । २५ ।

त्वन्तत्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम् । चात् पुंसि । सक्तुः सक्तु ।

प्राग्रश्मेरकारान्तः । २६ ।

इत ऊर्द्ध्वं रश्मिशब्दघटितसूत्रपर्य्यन्तमकारान्तोऽधिक्रियते ।

कोपधः । २७ ।

ककार उपधाभूतो यस्य तथाभूतोऽकारान्तः पुंसि स्यात् । स्तवकः कारकः कोरकः । कारकपाठकादयस्तु विशेषणशब्दत्वेन त्रिलिङ्गाः । अत्र च प्रकरणे प्रायः विशेष्यशब्दानामेव लिङ्गमनुशिष्यते न तु विशेषणशब्दानामिति न व्यभिचारः ।

चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके । २८ ।

कोपधतया पुंस्त्वे प्राप्तेऽपवादः । एते शब्दाः क्लीबे स्युः । चिबुकं शालूकं प्रातिपदिकमित्यादि ।

कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतटाक-निष्कशुल्कवर्चस्कपिनाकभाण्डककटकदण्डकपिटकता-लकफलककल्कपुलाकानि नपुंसके च। २९।

एते शब्दाः पुंसि क्लीवे च स्युः। पुंस्त्वे प्राप्ते पक्षे क्लीवत्वार्थं सूत्रम्। कण्टकः कण्टकम् अनीकः अनीकमित्यादि।

टोपधः। ३०।

टोपधः अकारान्तः पुंसि स्यात्। घटः पटः।

किरीटमुकुटललाटवटवीटशृङ्गाटकरटलोष्टानि नपुंसके। ३१।

पूर्व्वसूत्रापवादः। एते शब्दाः क्लीवे स्युः। किरीटं मुकुटं ललाटमित्यादि।

कुटकूटकपटकपाटकर्पटनटनिकटकीटकटानि नपुंसके च। ३२।

एते शब्दाः नपुंसके पुंसि च स्युः। कुटं कुटः कूटं कूटः कपटं कपट इत्यादि।

णोपधः। ३३।

णोपधोऽकारान्तः पुंसि स्यात्। गुणः गणः पाषाणः।

ऋणलवणपर्णतोरणरणोष्णानि नपुंसके। ३४।

पूर्व्वसूत्रापवादः। ऋणं लवणम् पर्णं तोरणमित्यादि। अमरस्तु "तोरणोऽस्त्री" इत्युक्तवान् तन्मूलं मृग्यम्। उष्णा-

शब्दस्य सर्ववाचित्वे एव क्लीवता तद्वति तु गुणवचनत्वेन त्रिलिङ्गत्वम्। उष्णः वह्निः उष्णा यवागूरित्यादि।

कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्ण-तृणानि नपुंसके च। ३५।

एते शब्दाः क्लीवे पुंसि च स्युः। कार्षापणं कार्षापण इत्यादि।

थोपधः। ३६।

थकारोपधः अकारान्तः पुंसि स्यात्। रथः अर्थः।

काष्ठपृष्ठरिक्थोक्थानि नपुंसके। ३७।

पूर्वस्यापवादः। एते शब्दाः क्लीवे स्युः। काष्ठम् उक्थं (सामावयवभेदः)।

काष्ठा दिगर्था स्त्रियाम्। ३८।

दिग्वाचककाष्ठाशब्दः स्त्रियां स्यात्। काष्ठा दिक्। दिशि इत्यनेनेष्टसिद्धौ सीमार्थेऽपि स्त्रीत्वार्थमर्थग्रहणं तेन "स्वयं विशीर्ण-द्रुमपर्णवृत्तिता परा हि काष्ठा" इति कालिदासप्रयोगः।

तीर्थप्रोथयूथानि नपुंसके च। ३९।

चादधिकारात् पुंसीत्येवानुवर्त्यते न तु स्त्रियामिति। तेन "प्रोथमस्त्रियाम्" इत्यमरोक्तिः। तीर्थं तीर्थः प्रोथं प्रोथः

नोपधः। ४०।

अदन्तो नोपधः पुंसि स्यात्। इनः फेनः।

जघनाजिनतुहिनकाननवनवृजिनविपिनवेतन-

शासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके। ४१।

पूर्व्वसूत्रापवादः। शासनशब्दः परित्यक्तुं शक्यते ल्युडन्तत्वेन क्लीवत्वस्य वक्ष्यमाणत्वात्। एते शब्दाः क्लीवे स्युः। जघनम् अजिनं तुहिनं काननमित्यादि।

मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च। ४२।

एते शब्दाः पुंसि क्लीवे च स्युः। मानादिषु केषाञ्चिन्नान्तत्वेन पुंस्त्वे केषाञ्चिच्च ल्युडन्ततया तद्बाधकसूत्रेण क्लीवत्वे प्राप्ते च उभयलिङ्गतार्थं सूत्रम्। मानः मानं यानः यानम्। वस्तुतः "करणाधिकरणयोर्ल्युट्" इति वक्ष्यमाणसूत्रेण त्रिलिङ्गत्वप्राप्तौ पूर्व्वापवादेन नपुंसकत्वमेवेति तदपवादार्थं सूत्रम्।

पोपधः। ४३।

अदन्तः पोपधः पुंसि स्यात्। धूपः दीपः यूपः।

पापरूपोडुपतापशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके। ४४।

पूर्व्वसूत्रापवादः। एते शब्दाः क्लीवे स्युः। पापम् रूपम्

शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च। ४५।

एते शब्दाः पुंसि क्लीवे च स्युः। शूर्पः शूर्पमित्यादि।

भोपधः । ४६ ।

अदन्तः भोपधः पुंसि स्यात् । करभः कुम्भः शलभः ।

तलभं नपुंसकम् । ४७ ।

पूर्व्वसूत्रापवादः । तलभम् ।

जृम्भं नपुंसके च । ४८ ।

जृम्भं जृम्भः । अङि तु स्त्रीत्वात् जृम्भा ।

मोपधः । ४९ ।

अदन्तः मोपधः पुंसि स्यात् । सोमः स्तोमः भीमः (मध्यमपाण्डवः) भीतिहेतुवाचित्वे विशेष्यलिङ्ग एव ।

रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके । ५० ।

पूर्व्वसूत्रापवादः । रुक्मं सिध्मम् । आत्मनीति विभक्त्यर्थेऽव्ययीभावे अनन्तत्वेनाच्समासान्ते टिलोपेऽदन्तत्वम् तस्य चाव्ययत्वेऽपि नपुंसकत्वकथनम् अदन्तमोपधत्वेन प्राप्त पुंस्त्वापवादार्थम् । वस्तुतः अध्यात्मशब्दः प्रत्याख्यातुं शक्यते ।

संग्रामदाड़िमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च । ५१ ।

एते शब्दाः नपुंसके चात् पुंसि च स्युः । संग्रामं संग्रामः । दाड़िमं दाड़िमः । उद्दामशब्दः प्रचण्डवाची । उद्यतो दामाया इति विग्रहे तु विशेष्यलिङ्ग एव ।

योपधः। ५२।

अदन्तः योपधः पुंसि स्यात्। हयः गवयः समयः।

किसलयेन्द्रियहृदयोत्तरीयाणि नपुंसके। ५३।

पूर्वसूत्रापवादः। इदं किसलयम् इन्द्रियम्।

गोमयकषायमलयान्वयाव्ययानि नपुंसके च। ५४।

एते शब्दाः नपुंसके चात् पुंसि च स्युः। गोमयं गोमयः। कषायस्तु रसवाची "तुवरस्तु कषायोऽस्त्री" इत्यमरः। तद्वति तु त्रिलिङ्गः। अव्ययशब्दः क्लीववाची। व्ययाभाववाची तु नास्य विषयः व्ययशब्दस्याजन्ततया पुंस्त्वेन ततो नञ् तत्पुरुषेऽपि पुंस्त्वमिति ततोऽर्थाभावेऽव्ययीभावे क्लीवतेति भेदः।

रोपधः। ५५।

अदन्तः रोपधः पुंसि स्यात्। क्षुरः अङ्कुरः।

द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रच्छिद्रपारतीर-दूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारो-दराजस्रशरीरकन्दरमन्दरपञ्जराजरजठराजिर-वैरचामरपुष्करगह्वरकुटीरकुलीरचत्वरकाश्मीरनी-राम्बरशिशिरतन्त्रयन्त्रक्षेत्रछत्रमित्रकलत्रचित्रसूत्र-वक्त्रनेत्रगोत्राङ्गुलित्रतनुत्रास्त्रशस्त्रशास्त्रवस्त्रपत्त्रपात्र-नक्षत्राणि नपुंसके। ५६।

पूर्वसूत्रापवादः। एते शब्दाः नपुंसके स्युः। इदं द्वारम्। अत्र स्फारशब्दो रोगभेदवाची प्रकाशवाची तु विशेष्यलिङ्ग एव।

वक्रशब्दः नद्याः पुटभेदेवाची कुटिलवाची तु विशेष्यलिङ्गः। क्षिप्रः शीघ्रार्थे तद्वति विशेष्यलिङ्गः। क्षुद्रशब्द उपद्रवभेदे तद्वति विशेष्यलिङ्गः। दूरशब्दो दूरत्वे, कृच्छ्रशब्दः कृच्छ्रत्वे तद्वति तु विशेष्यलिङ्गः। गभीरशब्दो गाम्भीर्य्ये तद्वति विशेष्यलिङ्गः। क्रूरं क्रौर्य्ये क्रौर्य्यवति त्रि०। चित्रं वर्णे तद्वति त्रि०। अजस्रं सातत्ये तद्वति त्रि०। शिशिरं शीतलस्पर्शे तद्वति त्रि०।

शुक्रमदेवतायाम्। ५७।

देवभिन्नार्थे शुक्रशब्दः क्लीवे स्यात्। शुक्रं रेतः। शुभ्रवर्णवाची तु गुणवचनत्वात् विशेष्यलिङ्गः। देवे तु पुमान्।

चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च। ५८

एते शब्दाः क्लीवे चात् पुंसि च स्युः। चक्रं चक्रः। शिशिरशब्दस्तु हिमे स्पर्शे च पुंनपुंसकलिङ्गः स्पर्शवति त्रिलिङ्गः।

षोपधः। ५९।

अदन्तः षोपधः पुंसि स्यात्। वृषः वृक्षः यक्षः।

शिरीषजोषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके। ६०।

पूर्व्वसूत्रापवादः। शिरीषं जोषम्। अम्बरीषं भर्ज्जनपात्रभेदः मुनिभेदे तु पुमान्। कल्माषं शस्यभेदे वर्णभेदे च तद्वति तु त्रिलिङ्गः।

यूषकरीषमिषविषवर्षाणि नपुंसके च। ६१।

एते क्लीबे चात् पुंसि च स्युः। यूषं यूषः। वर्षं वर्षः (वृष्टिः) वत्सरे ऋतुभेदे च स्त्री।

सोपधः। ६२।

अदन्तः सोपधः पुंसि स्यात्। वत्सः वायसः महानसः।

मानसविसबुससाहस्रानि नपुंसके। ६३।

पूर्व्वसूत्रापवादः। एते क्लीबे स्युः। मानसं विसमित्यादि।

चमसरसनिर्य्यासोपवासकार्पासवासमासकास-कांसमांसानि नपुंसके च। ६४।

एते पुंनपुंसकयोः स्युः। चमसं चमस इत्यादि।

कंसश्चाप्राणिनि। ६५।

अप्राणिनि कंसशब्दः क्लीबे पुंसि च स्यात्। कंसं कंसः पान-भोजनम् मथुराधिपे तु कंसः। चकरोऽदन्ताधिकारसमाप्त्यर्थः।

रश्मिदिवसाभिधानि। ६६।

रश्मिदिवसपर्य्यायशब्दाः पुंसि स्युः। रश्मिर्मयूखः किरणः। दिवसो घस्रः।

दीधितिः स्त्रियाम्। ६७।

पूर्व्वसूत्रापवादः। इयं दीधितिः।

दिनाहनी नपुंसके। ६८।

दिवसाभिधानत्वे पुंस्त्वे प्राप्ते तदपवादः। दिनम् अहः।

मानाभिधानानि । ६६ ।

मीयतेऽनेनेति मानं तद्विशेषाभिधानानि पुंसि स्युः । कुडवः प्रस्थः ।

द्रोणाढ़कौ नपुंसके च । ७० ।

मानविशेषवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीवतायै सूत्रम् । द्रोणः द्रोणम् आढकः आढ़कम् ।

खारीमानिके स्त्रियाम् । ७१ ।

पुंस्त्वापवादार्थं सूत्रम् । इयं खारी इयं मानिका ।

दाराक्षतलाजानां बहुत्वञ्च । ७२ ।

दारशब्दस्य स्त्रीत्वे प्राप्ते रोपधत्वेन पुंस्त्वसिद्धावपि बहुत्वार्थं अन्ययोरप्राप्तौ बहुत्वार्थञ्च सूत्रम् । एते शब्दाः पुंसि नित्य-बहुवचनान्ताश्च स्युः । इमे दाराः । अक्षताः लाजाः ।

नाड्यपजनोपपदानि व्रणाङ्गपदानि । ७३ ।

नाडीपूर्व्वपदः व्रणान्तशब्दः अपपूर्व्वकोऽङ्गशब्दः जनपूर्व्वः पद-शब्दश्च पुंसि स्यात् । परवल्लिङ्गत्वेन क्लीवादिलिङ्गत्वे प्राप्ते नित्यपुंस्त्वार्थमारम्भः । नाडीव्रणः । अपाङ्गः नेत्रान्ते, अङ्गापगते तु त्रिलिङ्गः । जनपदो (देशे) जनानां पदे तु क्लीवलिङ्गः ।

मरुद्गरुदुत्तरद्दृत्विजः । ७४ ।

एते शब्दाः पुंसि स्युः । अयं मरुत् गरुत् (पक्षः) । उत्तरत् उत्पूर्व्वात् तरतेरतिप्रत्ययान्तः शतृप्रत्ययान्तस्तु त्रिलिङ्गः । तरन् तरन्ती तरत् । अयम् ऋत्विक् ।

ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलि-
रविकविमुनयः। ७५।

एते शब्दाः पुंसि स्युः। अयमृषिः राशिः। बलिः पूजोपहारे राजग्राह्ये करे दानवभेदे एव पुमान् उदरावयवे तु स्त्रीलिङ्गाधिकारस्थेन (२५) सूत्रेण स्त्रीलिङ्ग इति भेदः।

ध्वजगजमुञ्जपुञ्जाः। ७६।

एते पुंसि स्युः। ध्वजः पताका "ध्वजमस्त्रियाम्" इत्यमरोक्तिः अपाणिनीयतयोपेक्ष्या। मूलं वा तस्य मृग्यम्।

हस्तकुन्तान्तवातव्रातदूतधूर्त्तसूतचूतमुहूर्त्ताः। ७७।

एते पुंसि स्युः। हस्तः सूतः सारथौ प्रसूते तु त्रिलिङ्गः। "मुहूर्त्तोऽस्त्रियाम्" इत्यमरोक्तिश्चिन्त्यमूला।

षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्ड-
पाषण्डशिखण्डाः। ७८।

एते पुंसि स्युः। षण्डः मण्डः गण्डः। एतद्विरुद्धाभिधायिनी अमरोक्तिश्चिन्त्यमूला।

वंशांशपुरोडाशाः। ७९।

एते पुंसि स्युः। वंशः अंशः पुरोडाशः (हविर्भेदः)।

हृदकन्दकुन्दबुद्बुदशब्दाः। ८०।

एते शब्दाः पुंसि स्युः। हृदः कन्दः कुन्दो वृक्षः पुष्पे तु कुन्दम्। शब्दः।

अर्घपथिसख्यृभुक्षिस्तम्बनितम्बपूगाः ।८१ ।

एते पुंसि स्युः । एषोऽर्घः । वामनैस्तु अर्घ्यमित्येव यदन्ततया प्रयोज्यं तत्र क्लीवलिङ्गम् ।

पल्लवपल्ललकफरेफकटाहनिर्व्यूहमठमणितरङ्ग-गन्धस्कन्धमृदङ्गसङ्गसमुद्गपुङ्खाः ।८२ ।

अयं पल्लवः । "पल्लवोऽस्त्री" इत्यमरोक्तिश्चिन्त्यमूला ॥

सारथ्यतिथिकुक्षिवस्त्यञ्जलयः । ८३ ।

एते पुंसि स्युः । अयं सारथिः अतिथिरित्यादि ।

अथाल्पावशिष्टम् । नौ ण चेति (३,३,६० सू०) घञचोः समुच्चितः अदेः णप्रत्ययोऽपि पुंसि स्यात् । न्यादः । स्तम्बे क च (३,२,८२ सू०) स्तम्बोपपदात् हन्तेः कप्रत्ययः पुंसि स्यात् स्तम्बघ्नः । द्वितोऽथुच् (३,३,८९ सू०) एतद्विहितोऽथुजन्तः पुंसि स्यात् । वेपथुः वमथुः । पूर्ववदश्ववडवौ (२,४,२७ सू०) निर्द्देशात् परवल्लिङ्गतापवादेन पुंस्त्वमेव अश्ववडवौ द्वित्वमविवक्षितम् । अश्ववडवाः ।

एतद्भिन्नाः केचित् शब्दाः "कान्तः सूर्य्येन्दुपर्य्यायपूर्व्वोऽयः पूर्व्वकोऽपि" चेत्यमरसिंहेन पुंलिङ्गतया विहिताः । सूर्य्यकान्तः तरणिकान्तः चन्द्रकान्तः इन्दुकान्तः अयस्कान्तः लौहकान्तः इत्यादयः । श्रीवेष्टः श्रीवासः वृकधूपः गुग्गुलुः कङ्कः सिह्लकः इत्यादयः वृक्षनिर्यासभेदाः, पुङ्खः न्युङ्खः पिण्डः षौण्डः पिचण्डः गडुः लगुडः दतिः कासमर्द्दः

र्बुदः (रोगभेदः) गोलः हिङ्गुलः पुद्गलः वेतालः मल्लः भल्लः पट्टिशः पतद्ग्रहः ।

इति पुंलिङ्गाधिकारः ।

नपुंसकम् । १ ।

इत ऊर्द्ध्वं वक्ष्यमाणा बाधमन्तरेण क्लीवलिङ्गाः स्युरित्यधिकारः ।

भावे ल्युडन्तः । २ ।

भावार्थकल्युट्प्रत्ययान्तः धातुः क्लीवे स्यात् । गमनं हसनम् । भावे किं ? पच्यतेऽनेनेति करणे ल्युट् पचनो दहनोऽग्निः । इध्मव्रश्चनः कुठारः, पाषाणदारणः टङ्कः ।

निष्ठा च । ३ ।

भावार्थकनिष्ठान्तो धातुः क्लीवे स्यात् । हसितं गीतं वृत्तम् ।

त्वष्यञौ तद्धितौ । ४ ।

भावे इत्यनुवर्त्तते । भावे विहितो ये त्वष्यञौ तद्धितौ तदन्ताः क्लीवे स्युः । भावे—शुभ्रत्वं शौभ्र्यम्, जडत्वं जाड्यम् । ष्यञः षित्त्वसामर्थ्यात् पक्षे स्त्रीत्वमपि तेन षिद्गौरादिभ्यश्चेति ङीषि य लोपे, औचिती औचित्यं, माधुरी माधुर्यं, चातुरी चातुर्यम् ।

कर्म्मणि च ब्राह्मणादिगुणवचनेभ्यः । ५ ।

ब्राह्मणादिभ्यो गुणवचनेभ्यश्च कर्म्मणि चात् भावे यौ विहितौ त्वष्यञौ तदन्ताः क्लीवे स्युः । ब्राह्मणस्य कर्म्म भावो वा ब्राह्म-

णत्वं ब्राह्मण्यम् । "चातुर्वर्ण्यादीनां स्वार्थे उपसंख्यानमिति" वार्त्तिकोक्तेः स्वार्थे ष्यञ् चातुर्वर्ण्यं त्रैलोक्यं चातुर्वैद्यं षाड्गुण्यम् "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इति भाष्योक्तेः प्रकृतिलिङ्गवचनातिक्रमः ।

यद्यढक्यगञण्वुञ्छाश्च भावकर्म्मणि । ६ ।

भावे कर्म्मणि चार्थे विहिता ये यद्यादयस्तदन्ताः क्लीवे स्युः । भावकर्म्मणीति ग्रहणं स्वार्थनिवृत्त्यर्थम् । स्तेनस्य भावः कर्म्म वा "स्तेनाद्यत् नलोपश्चेति" (५,१,१२५) यति स्तेयम् । सख्युर्भावः कर्म्म वा "सख्युर्य इति" (५,१,१२६) ये सख्यम् । कपेर्ज्ञातेः वा भावादि "कपिज्ञात्योर्ढगिति" (५,१,१२७) ढकि कापेयम् ज्ञातेयम् । सेनापतेर्भावादि "पत्यन्तपुरोहितादिभ्यो यगिति" (५,१,१२८) यकि सैनापत्यम् आधिपत्यं पौरोहित्यम् । उष्ट्रस्य भावादि "प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञिति" (५,१,१२९) अञि औष्ट्रम् तस्य प्राणधारिजातिवचनत्वात्, शैशवं कौमारं वयोवचनात्वात्, औद्गात्रं चातुर्होत्रम् । द्विहायनस्य भावादि "हायनान्तयुवादिभ्योऽण् इति (५,१,१३०) अणि द्वैहायनं यौवनम् । वयोवचनत्वेन प्राप्तावपि नित्यस्वरार्थं वचनम् । इगन्ताच्च लघुपूर्वात्" (५,१,१३१) अण् शौचम् मार्दवं पाटवम् । "योपधाद्गुरूपोत्तमाद्वुञ् (५,१,१३२) रमणीयस्य भावादि रामणीयकं कामनीयकम् । "होत्रादिभ्यश्छ इति (५,१,१३५) छे अच्छावाकीयम् अच्छवाको होतृविशेषः अनुक्तसमुच्चय चकारः सर्वे येयाश्च परिशिष्टे दर्शयिष्यन्ते ।

अव्ययीभावः । ७ ।

अव्ययीभावसमासनिष्पन्नः क्लीवलिङ्गः स्यात् । अधिस्त्रि स्त्रिया-

मिति विग्रहे विभक्त्यर्थेऽव्ययीभावे तदन्तस्य क्लीवतया ह्रस्वः । उपनदि पक्षे अच्समासान्ते उपनदम् ।

द्वन्द्वैकत्वम् । ८ ।

समाहारद्वन्द्वनिष्पन्नः शब्दः क्लीवे स्यात् । पाणिपादम् धवखदिरम् ।

अभाषायां हेमन्तशिशिरावहोरात्रे च ।९।

संस्कृतभाषाभिन्ननियमके वेदे हेमन्तशिशिररूपो द्वन्द्वसमाहारः नैकवत् क्लीबलिङ्गो वा । किन्तु "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरि-त्युक्तेः परवल्लिङ्गता द्विवचनान्तता च । तथा अहोरात्रशब्दो-द्वन्द्वनिष्पन्नः क्लीव एव "रात्राह्नाहाः पुंसीति" पुंलिङ्गा-पवादः । अभाषायामित्युक्तेः भाषायां हेमन्तशिशिरम् अहो-रात्रइत्येव ।

अनञ्कर्म्मधारयस्तत्पुरुषः । १० ।

इतः परं नञ्कर्म्मधारयभिन्नस्तत्पुरुषोऽधिक्रियते

अनल्पे छाया । ११ ।

बहुसम्बन्धिनी या छाया तदन्तस्तत्पुरुषः क्लीवे स्यात् । नपुं-सकत्वेन आपो ह्रस्वः । इक्षूणां छाया इक्षुच्छायम् । "इक्षु-च्छायानिषादिन्य, इति तु आनिषादिन्य इत्याङ्प्रश्लेषेण समर्थनीयम् । शराणां छाया शरच्छायम् ।

राजाऽमनुष्यपूर्व्वा सभा । १२ ।

राजपर्य्यायपूर्व्वः मनुष्यभिन्नमनुष्यसदृशतुल्यपूर्व्वश्च छायान्-

स्तत्पुरुषः क्लीबे स्यात् । नृपाणां सभा नृपसभम् । इनसभम् राजपर्य्यायपूर्व्वस्यैवेष्यते न तु राजस्वरूपविशेषपूर्व्वस्य । तेन राजसभा चन्द्रगुप्तसभा । भाष्यकृता चन्द्रगुप्तसभेतिप्रत्युदाहरणात् चन्द्रगुप्तस्य भाष्यकारसमकालत्वं ततः प्राक्कालत्वं वा प्रतीयते । अमनुष्येति पर्य्युदासात् तत्सदृशरक्षःपिशाचादिपूर्व्वकस्यैव, तेन रक्षःसभं पिशाचसभम् । तत्पूर्व्वकस्य किम् ? श्वसभा मृगसभेत्यादि ।

सुरासेनाच्छायाशालानिशाः स्त्रियाञ्च । १३ ।

एतदन्तस्तत्पुरुषः स्त्रियां चात् क्लीबे च स्यात् । यवसुरं यवसुरा ब्राह्मणसेनं ब्राह्मणसेना । अबहुसम्बन्धार्थं छायाशब्दग्रहणम् । कुड्यच्छाया कुड्यच्छायम् । गोशालं गोशाला । श्वनिशं श्वनिशा । तत्पुरुष इत्यधिकारात् बहुव्रीहौ त्रिलिङ्गः । दृढ़सेनः दृढ़सेना दृढ़सेनमित्यादि । अनञ्कर्म्मधारय इत्युक्तेः असेना परमसेना इत्यादि स्त्रियामेव । "अशाला च (२,४, २४) पा० सू०) शालाभिन्नार्थकसभान्तस्तत्पुरुषः क्लीबे स्यात् । स्त्रीसभम् स्त्रीसंघात इत्यर्थः । शालायां धर्म्मसभा धर्म्मशालेत्यर्थः । संज्ञायां कन्थोशीनरेषु (२,४,२०) पा० सू०) कन्थान्तस्तत्पुरुषः क्लीबे स्यात् । सा चेत् कन्था उशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सुशमस्यापत्यानि सौशमयस्तेषां कन्था । संज्ञायां किं वीरणकन्था । उपज्ञोपक्रमान्तः तदाद्याचिख्यासायाम् (२,४,२७सू० पा०) उपज्ञान्त उपक्रमान्तश्च तत्पुरुषः नपुंसके स्यात् । तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते । उपज्ञायते इत्युपज्ञा कर्म्मणि

अङ्। पाणिनेरुपज्ञा पाणिन्युपज्ञम्। उपक्रम्यते इत्युपक्रमः नन्दस्य उपक्रमः नन्दोपक्रमं द्रोणः। भाष्यकारस्य तथोदाहरणात् नन्दादर्वाचीनत्वं भाष्यकृत इति प्रतीयते।

परवत्। १४।

उक्ताभिन्नस्तत्पुरुषः परवल्लिङ्गः स्यात्। राजपुरुषः राजमहिषी राजधनम्।

रात्राह्नाहाः पुंसि। १५।

कृतसमासान्तरात्राद्यन्तस्तत्पुरुषः पुंस्येव स्यात् परवल्लिङ्गतापवादः। तदन्तद्वन्द्वोऽपि पुंसि स्यात् सूत्रपाठे "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युपक्रमेण एतदपवादसूत्रे द्वन्द्वपदस्यानुवर्त्तनात्। पूर्व्वरात्रः अपररात्रः पूर्व्वाह्णः अपराह्णः द्व्यहः। द्वन्द्वे अहश्च रात्रिश्च अहोरात्रः।

संख्यापूर्व्वा रात्रिः। १६।

संख्यावाचकपूर्व्वपदः रात्रान्तस्तत्पुरुषः क्लीबे स्यात्। पुंस्त्वापवादः। त्रिरात्रं पञ्चरात्रं गणरात्रम्।

अपथपुण्याहे नपुंसके। १७।

अपथपुण्याहशब्दौ नपुंसके स्तः। अपथम्। तत्पुरुष इत्येव अन्यत्र अपथोदेशः। पुण्याहस्य तु पुंस्त्वे प्राप्तेऽयमारम्भः स तु तत्पुरुष एव बहुव्रीहौ समासान्ताप्रसक्तेः वार्त्तिके "पुण्यसुदिनाभ्यामह्नः क्लीवता" इत्युक्तेः। सुदिनाहम्। अपथेति निर्द्देशात् कृतसमासान्त एव सूत्रं प्रवर्त्तते नेह अपन्थाः।

द्विगुः स्त्रियाञ्च । १८ ।

द्विगुसमासनिष्पन्नः स्त्रियां चात् नपुंसके च स्यात् । व्यवस्थित-विभाषेयं व्यवस्था च सूत्रपाठेन वार्त्तिकपाठेन दर्शिता यथा स नपुंसकम् २,४,१७ सू० पा०) स समाहारद्विगुर्नपुंसकलिङ्गः स्यात् । परवल्लिङ्गतापवादः । पञ्चगवम् । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः (वा०) । पञ्चमूली, त्रिलोकी, "आबन्तो वा (वा०) आबन्तो द्विगुः स्त्रियां क्लीबे च स्यात् । पञ्चखट्वी पञ्च-खट्वम् । अनो नलोपश्च वा च द्विगुः स्त्रियाम्, (वा०) अन्नन्त द्विगोर्वा नलोपः । नलोपपक्षे स्त्रीत्वं पक्षे क्लीवतेत्यर्थः । पञ्चतक्षी पञ्चतक्षम् । पात्राद्यन्तस्य न, (वा०) न स्त्रीत्वमपि तु "स नपुंसकम्" इति क्लीवत्वमेव । अदन्तत्वेन स्त्रीत्वे प्राप्ते तदपवादार्थं वार्त्तिकम् । पञ्चपात्रं त्रिभुवनम् ।

इसुसन्तः । १९ ।

इस्प्रत्ययान्त उस्प्रत्ययान्तश्च शब्दः क्लीवे स्यात् । हविः धनुः ।

अर्चिः स्त्रियाञ्च । २० ।

इसन्तत्वेन क्लीवत्वे प्राप्ते वचनम् । इदमियं वा अर्चिः ।

छदिः स्त्रियामेव । २१ ।

इसन्तत्वेऽपि छदिशब्दः स्त्रियां स्यात् न तु क्लीवे । इयं छदिः एवमनुशासने स्थिते पटलं छदिरित्यमरव्याख्यातारः पटल-साहचर्य्यात् छदिषः क्लीवतां वदन्तः उपेक्ष्याः ।

मुखनयनलोहवनमांसरुधिरकार्मुकविवरजल-हलधनान्नाभिधानानि । २२ ।

एतद्वाचकानि क्लीवे स्युः । मुखम् आननम् । नयनं लोचनम् । लोहं कालम् अयः । वनं गहनम् विपिनम् । मांसमामिषं पलम् । रक्तं रुधिरं शोणितम् अस्रम् । कार्मुकं शरासनम् । विवरं छिद्रं बिलम् । जलं सलिलं वारि । हलं लाङ्गलम् । धनं द्रविणं वसु । अन्नमशनम् इत्यादि ।

सीरार्थौदनाः पुंसि । २३ ।

पूर्व्वसूत्रापवादः । एते शब्दाः पुंसि स्युः । सीरः । अर्थः "रायोहलीति" सूत्रनिर्द्देशात् रैशब्दस्य धनवाचित्वेऽपि पुंस्त्वमेव । क्लीवत्वे रैशब्दस्य ह्रस्वे रिण इति स्यात् । ओदनः ।

वज्रनेत्रारण्यगाण्डीवानि पुंसि च । २४ ।

एते शब्दाः पुंसि चात् क्लीवे च स्युः । वज्रो वज्रम् । नेत्रो नेत्रम् । अरण्यः अरण्यम् । गाण्डीवः गाण्डीवम् ।

अटवी स्त्रियाम् । २५ ।

वनवाचित्वेऽपि अटवीशब्दः स्त्रियां स्यात् । इयमटवी ।

लोपधः । २६ ।

तूलादीनाम् अदन्तानामपवादतया परसूत्रे निर्द्देशेन अदन्ता एवेह प्रकरणे गृह्यन्ते । एवं सर्व्वत्र । अदन्तो लोपधः क्लीवे स्यात् । कुलं कूलम् स्थलम् स्थानमात्रे अकृत्रिमभूमौ तु ङीविधानसामर्थ्यात् स्त्रीत्वमेव । तेन स्थली अकृत्रिमा भूमिः ।

तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि । २७ ।

पूर्व्वसूत्रापवादः । तूलः उपलः । तालः गानक्रियामानम् ।

छत्त्ववाचकस्य जातित्वात् द्विलिङ्गता अत एव हिन्तालस्यापि परत्वात् द्विलिङ्गता न विरुध्यते। तरलः हारमध्यगमणिः। चञ्चलपर्य्यायस्तु त्रिलिङ्गः क्रियोपाधित्वात्।

शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालगलपलालविडालखिलशूलाः पुंसि च। २८।

एते शब्दाः पुंसि चात् क्लीवे स्युः। लोपधत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम्। शीलं शीलः मूलः मूलमित्यादि।

शतादिसंख्या। २९।

शतादिशब्दाः संख्यासंख्येययोः क्लीवे स्युः। शतं सहस्रम्। शतादिः किम्? एको द्वौ बहवः। संख्या किम्? शतः (शतशृङ्गपर्वतः)।

शतायुतप्रयुताः पुंसि च। ३०।

एते शब्दाः पुंसि चात् क्लीवे। अयं शतः इदं शतम्। अयुतः अयुतम् प्रयुतः प्रयुतम्। संख्यावाचकत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम्।

लक्षाकोटी स्त्रियाम्। ३१।

एते स्त्रियां स्तः। लक्षा कोटिः। इकारान्तत्वात् पक्षे ङीप् कोटी। लक्षशब्दस्य क्लीवत्वमपि विप्रतिषेधेऽपरं कार्य्यमिति परिभाषया तथात्वम् अत एव "वा लक्षा नियुतञ्च तत्" इत्यमरः।

सहस्रः पुंसि च। २२।

अयं पुंसि चात् क्लीबे स्यात्। क्लीबत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम्। सहस्रः सहस्रम्।

मन् द्व्यच्कोऽकर्त्तरि। २३।

कर्त्तृभिन्नार्थकमन्प्रत्ययान्तः द्व्यच्कश्चेत् क्लीबे स्यात्। कर्म्म वर्म्म शर्म्म, नर्म्म,। द्व्यच्कः किम्? अणोर्भावः अणिमा एवं लघिमा। नन्तत्वेन पुंस्त्वम्। अकर्त्तरि किम्? ददातीति दामा।

ब्रह्म पुंसि च। २४।

ब्रह्मन्शब्दः पुंसि चात् क्लीबे च स्यात्। व्यवस्थितविभाषेयम् वेदे सत्ये तपसि परात्मनि च क्लीवम् चतुर्मुखे पुमानिति ब्रह्मा।

नामरोमणी नपुंसके। २५।

एते क्लीबे स्तः। मन्द्व्यच्क इत्यस्य प्रपञ्चः। नाम रोम।

असन्तो द्व्यच्कः। २६।

अकर्त्तरीत्यनुवर्त्तते। अकर्त्त्रर्थकास्प्रत्ययान्तः द्व्यच्कश्चेत् क्लीबे स्यात्। यशः तपः मनः। अकर्त्तरीत्यनुवृत्तेर्नेह। वेधाः। द्व्यच्कः किम्? पुरोधाः चन्द्रमाः।

अप्सराः स्त्रियाम्। २७।

प्रायेणायं बहुवचनान्तः। इमाः अप्सरसः। प्रायेणेत्युक्तेः अप्सरा वै रूपिणी मेनेति भाष्यप्रयोगः सङ्गच्छते। इदं स्त्रीलिङ्गे निर्द्देष्टुमुचितम् असन्तत्वेन प्राप्तावपि द्व्यच्कत्वाभावेन प्राप्त्यभावात् तदपवादत्वासंभवात्।

त्रान्तः । ३८ ।

रोपधत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम् । त्रप्रत्ययान्तः क्लीबे स्यात् । पत्त्रम् छत्त्रम् दात्रं कलत्रम् गोत्रम् । गोत्राशब्दस्य भूमिपर्य्यायतया स्त्रीत्वमेव गोत्रशब्दस्य तु गिरि-पर्य्यायतया पुंस्त्वमेव। नेत्रशब्दस्य विशेषविधानात् पुंनपुंसकता ।

यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव । ३९ ।

एते शब्दाः स्त्रियां स्युः । त्रान्तत्वेन क्लीवताप्राप्तौ तदपवादार्थं सूत्रम् । दंश्यतेऽनया दन्शेः ष्ट्रन् तस्य षित्त्वेऽपि न ङीष् सूत्रे दंष्ट्रेति निर्द्देशात् । यात्रा मात्रा भस्त्रा दंष्ट्रा वरत्रा ।

भृत्रामित्रच्छात्रपुत्त्रमन्त्रवृत्रमैत्राः पुंसि । ४० ।

त्रान्तत्वेन क्लीवत्वे प्राप्ते तदपवादार्थं सूत्रम् । अयं भृत्रः । न मित्रम् अमित्रः मित्रशब्दस्य त्रान्ततया क्लीवत्वन नञ्-तत्पुरुषे परवल्लिङ्गतया तल्लिङ्गत्वापत्तौ ग्रहणसामर्थ्यात् पुंस्त्वम् । "तस्य मित्राण्यमित्रास्ते" इति "स्यातामसित्रौ मित्रे च" इति च माघः । मित्रशब्दस्य सूर्य्यार्थे रोपधत्वेन पूर्व्वविप्रतिषेधेन, देवविशेषवाचित्वेन च पुंस्त्वमेव। मित्त्रात् स्वार्थेऽण् मैत्रः वचनसामर्थ्यात् न प्रकृतिलिङ्गता ।

पत्त्रपात्रपवित्रसूत्रच्छत्राः पुंसि च । ४१ ।

त्रान्तत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थम् वचनम् । पत्रं पत्रः । पात्रं पात्रः । पवित्रं पवित्रः । अनुक्तसमुच्चयचकारेण स्त्रीत्वमप्यस्य । "पवित्रासि वैष्णवी" इति वेदमन्त्रः ।

बलकुसुमशुल्वपत्तनरणाभिधानानि । ४२ ।

एतेषां पर्यायशब्दाः क्लीबे स्युः । बलं सहः वीर्यं सामर्थ्यम् । कुसुमं पुष्पम् । सुमनःशब्दस्य विशेषाभिधानात् स्त्रीत्वम् । रणं युद्धम् आयोधनम् । युत्समिधोर्विशेषाभिधानात् स्त्रीत्वम् ।

पद्मकमलोत्पलानि पुंसि च । ४३ ।

पद्मादिशब्दाः क्लीबे पुंसि च स्युः । पद्मं पद्मः । "भाति पद्मः सरोवरे" इत्यादावालङ्कारिकैस्तु अप्रयुक्ततादोषोदाहरणतयाऽस्य पुंस्त्वमनुशासनसिद्धमित्यभ्युपगतम् । अत एव अर्द्धर्चादिसूत्रे पद्मं नपुंसकमेवेति वृत्तिग्रन्थोऽप्रयुक्ततादोषदृष्ट्यैवेत्युन्नेयः । कमलं कमलः इत्यादि ।

आहवसंग्रामौ पुंसि । ४४ ।

रणपर्य्यायतया क्लीबत्वे प्राप्ते तद्बाधनार्थं सूत्रम् । आहवः संग्रामः ।

आजिः स्त्रियामेव । ४५ ।

रणवाचित्वेन प्राप्तक्लीबताबाधनार्थं सूत्रम् । इयम् आजिः पक्षे ङीप् आजी ।

फलजातिः । ४६ ।

फलप्रधानवृक्षजातिवाची शब्दः क्लीबे स्यात् । आमलक्याः फलम् मयट् "फले लुक्" इति लुकि "लुक् तद्धितलुकि" इति "ङीषो लुकि क्लीबत्वम् । आमलकम् आम्रम् । तथा च विकारावयवप्रत्ययलुग्विषये एवास्य प्रवृत्तिः नान्यथा, तेन "जम्ब्वा वा" इति जम्बूशब्दात् अणि "लुप् चेति" तस्य लुप्पक्षे स्त्रीत्वमेव

लुक्पक्षे क्लीवता तदुभयाभावपक्षे प्रत्ययस्थितिः। तेन जम्बू जम्बु जाम्बवम्। अत एव "जम्बूः स्त्री जम्बू जाम्बवम्" इत्यमरः। "फले लुक्" इत्यत्र फलतीति व्युत्पत्त्या फलशब्दः प्रसवमात्र-वचनः। अत एव "द्विहीनं प्रसवे सर्व्वं हरीतक्यादयः स्त्रियाम्" इत्यमरः।

वृक्षजातिः स्त्रियामेव। ४७।

क्वचिदित्यध्याहार्य्यम्। हरितक्यादिप्रसववाचकशब्दः स्त्रिया मेव। हरीतक्याः फलम् "हरीतक्यादिभ्यश्च" इति फलार्थकप्रत्ययस्य लुपि स्त्रीत्वम् "हरीतक्यादिषु व्यक्तिः" इति वार्त्तिके हरीतक्यादीनां प्रकृतिलिङ्गत्वोक्तेः। स च गणः "हरितकी कोशातकी नखरजनी, शष्कण्डी, दाडी दोडी श्वेत-पाकी अर्ज्जुनपाकी द्राक्षा, काला ध्वाक्षा, गर्भीका कण्टकारिका पिप्पली चिञ्चा शेफालिका" इति। वृक्षजातिरित्युक्तेः फल-प्राधान्याभावेऽपि पुष्पप्रधानजातिवाचिनः पुष्पपरत्वेऽपि स्त्रीत्वम्। मालती मल्लिका। लुप् चेति (४,२,१६६) सूत्रे "फलपाकशुषामुपसंख्यानम्" इति वार्त्तिकोक्तेः व्रीहीणां फलानि-व्रीहयः मुद्गाः माषाः। "पुष्पमूलेषु बहुलम्" इति वार्त्ति-कोक्तेः बहुलग्रहणात् क्वचित् लुप् क्वचिन्नेति द्योतितम् तेन मल्लिकायाः पुष्पं मल्लिका एवं मालती। विदार्य्या मूलं विदारी। बहुलग्रहणात् क्वचिन्न पाटलानि पुष्पाणि, शाल्वानि मूलानि। बाहुलकात् पुष्पे मूले च वाच्ये क्वचित् लुक्। अशोकम् करवीरम्।

वियज्जगत्सकृत्शकृत्पृषच्छकृद्यकृदुदश्वितः। ४८।

एते शब्दाः क्लीबे स्युः। वियत् जगत्। सकृत्।

नवनीतावतानृतामृतनिमित्तवित्तपित्तव्रतरजतपलितानि। ४९।

एते शब्दाः क्लीबे स्युः। नवनीतम् अवतम् अनृतं (सुधा) मृत [भिन्ने लि०।

श्राद्धकुलिशपीठकुण्डाङ्कदधिसक्थ्यक्ष्यस्थ्यास्पदाकाशकण्वबीजानि। ५०।

एते शब्दाः क्लीबे स्युः। श्राद्धं कुलिशम्। आकाशः परित्याज्यः अग्रे पुंनपुंसकत्वोक्तेः, कण्वं (पापम्)

दैवं पुंसि च। ५१।

दैवशब्दः पुंसि चात् क्लीबे स्यात्। दैवः दैवम्।

धान्याज्यशस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि।५२।

योपधत्वेन पुंस्त्वे प्राप्तेऽपवादार्थं सूत्रम्। एते शब्दाः क्लीबे स्युः। धान्यम् आज्यं शस्यम्।

द्वन्द्ववर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरवृन्दारकाणि। ५३।

एते शब्दाः क्लीबे स्युः। द्वन्द्वं (मिथुनम्) वर्हम् इत्यादि।

अक्षमिन्द्रिये। ५४।

इन्द्रियार्थे अक्षशब्दः क्लीबे स्यात्। अक्षम्। इन्द्रिये किम्? रथाङ्गे द्यूतभेदादौ मा भूत्।

अथ नपुंसकावशिष्टमुच्यते तत्र भावे ल्युडन्त इत्युपलक्षणं क्त्यादीनाम्, तेन भावार्थकक्तल्याद्यन्ताः नपुंसके स्युः। भवि-

तव्यम् भवनीयम् भव्यं भाव्यं सत्यं ब्रह्मभूयम् । भावे इत्युक्तेः कर्म्मणि कर्तरि च त्रिलिङ्गा एव । कर्म्मणि—चेतव्यः चयनीयः चेय इत्यादि । कर्त्तरि—गेयः भव्य इत्यादि । सत्यादयश्च "अभिविधौ भावे इनुण्" (३,३,४४, सू०) इतीनुण्, तदन्तात् अणिनुणः इति (५,४,१५) स्वार्थे अणि सांराविणं साङ्कटिनम् । भावे खल्—दुर्भवं दुःशयम् । आतो युच् (३,३,२८) सुम्लानम् दुर्ग्लानम् ।

तस्य समूह (४,२,३७) इत्यधिकारे ये याद्याः स्त्रियामुक्ताः तद्भिन्नतद्धितान्ता नपुंसके स्युः । अण्—काकं वाकम् । भिक्षादिभ्योऽण् (४,२,३८) भैक्षम् गार्भिणम् । गोत्रादिभ्यो वुञ् (४,२,३९) औपगवकम् औक्षकम् औष्ट्रकम् औरभ्रकम् राजकम् राजन्यकं राजपुत्रकम् मानुष्यकम् आजकम् । केदाराद् यञ् च (४,२,४०) कैदार्य्यम् कैदारकम् । गणिकाया यञिति (वा०) गाणिक्यम्, ठञ् कवचिनश्च (४,२,४१) कावचिकम् कैदारिकम् । ब्राह्मणमाणववडवाद्यत् (४,२,४२) ब्राह्मण्यम् माणव्यम् वडव्यम् पर्श्वाणस् (वा०) पार्श्वम् । अनुदात्तादेरञ्(४,२,४४) कापोतम् मायूरम् । खण्डिकादिभ्यश्च (४,२,४५) खाण्डिकम् सैनम् औलुकमित्यादि । चरणेभ्यो धर्म्मवत् (४,२,४६) छान्दोग्यं काठकम्, अचित्तहस्तिधेनोष्ठक् (४,२,४७) साक्तुकम् हास्तिकम् धैनुकम् । केशाश्वाभ्यां यञ्छावितित (४,२,४८) कैश्यं कैशिकम् आश्वीयं आश्वम् । "सामान्ये नपुंसकम् (वा०) क्रियाव्ययानां भेदकानि नपुंसकलिङ्गानि स्युः । मृदु पचति कमनीयम् प्रातः । एतद्भिन्नाः कतिचिच्छब्दा नपुंसकतयाऽमरे परिगणिताः यथा उक्थं (सामावयवभेदः) तोटकं (छन्दो-

भेदः)। घोचम् (तालफलम्, तदीयफलस्यशस्याकार-पदार्थो वा)। पिच्छं (भक्तसंभूतमण्डः)। तिरीटम् (वेष्टनम्)। राजसूयं राजपेयं यज्ञविशेषत्वेऽपि अनेन बाधान्न पुंस्त्वम्। गद्यं पद्यं (कविकृतौ)। माणिक्यं भाष्यं सिन्दूरं चीरं चीवरं, लोकायतं हरितालम् विदलं (वंशपात्रभेदः स्थाली वा)।

इति नपुंसकलिङ्गानुशासनम्।

स्त्रीपुंसयोः। १।

इत ऊर्द्ध्वं वक्ष्यमाणाः स्त्रीपुंसलिङ्गाः स्युः। इत्यधिकारः।

गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसि-मरीचयः। २।

एते पुंसि स्त्रियां च स्युः। तत्र गोशब्दस्य पशुविशेषवाचित्वे स्त्रीपुंसलिङ्गता स्वर्गवाणकिरणनेत्रवाचित्वे पुंसि, भूमिदिग्वाग्-वाचित्वे स्त्रियामिति व्यवस्था। इयं गौः अयं गौः, इयमयं वा मणिः स्त्रीत्वपक्षे वा ङीप् मणी एवं सर्वत्र।

मन्युशीधुकर्कन्धुसिन्धुकण्डुरेणवः। ३।

एते स्त्रियां पुंसि च स्युः। इयमयं वा मन्युः शीधुः। कर्कन्धुः अप्राणिजातित्वात् स्त्रीत्वपक्षे ऊङ् कर्कन्धूः।

गुणवचनमुकारान्तं नपुंसकञ्च। ४।

गुणवचना उकारान्ताः शब्दाः नपुंसके चात् स्त्रीपुंसयोः स्युः। तेन त्रिलिङ्गाः। पटुः पट्वी पटु। मृदुः मृद्वी मृदु। उद-

न्तत्वविशेषणात् तद्भिन्नानां गुणवचनानां गुणपरत्वे पुंस्त्वम् गुणिपरत्वे त्रिलिङ्गता। शुभ्रः शुक्लः शुचिः वर्णः, तद्वति शुक्लं वस्त्रं शुक्लः पटः शुक्ला शाटी। एतत् सूत्रं परित्यक्तुं शक्यते गुणवचनञ्चेति त्रिलिङ्गस्यसूत्रेण परेणास्य बाधात्। तेन शुक्लं शुचि वा वस्त्रमित्युकारान्तत्वाभावेऽपि तेनैव त्रिलिङ्गता।

अपत्यार्थतद्धिताः। ५।

अपत्यार्थे विहिता ये तद्धितास्तदन्ताः स्त्रीपुंसयोः स्युः। औपगवः औपगवी। दाक्षिः दाक्षी, गार्ग्यः गार्गी, वैदः वैदी। अमरेण तु

"स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः।
जातिभेदाः पुमाख्याश्च स्त्रीयोगे सहमल्लकः॥"

इत्युक्तम्। तथा च द्विपदाः, चतुष्पदाः, षट्पदाः, उरगवाचिनः जातिविशेषवाचिनः, पुरुषाख्याये स्त्रीयोगे एव ते च स्त्रीलिङ्गास्तेन पुंपरत्वे पुंस्त्वं, स्त्रीपरत्वे स्त्रीत्वमिति द्विलिङ्गता। तत्र द्विपदाः—मानुषः मानुषी, विप्रः विप्रा, शूद्रः शूद्रा, बकः बकी, हंसः हंसी इत्यादि। चतुष्पदाः—मृगः मृगी, सिंहः सिंही, वृषभः वृषभी, इत्यादि। षट्पदाः—भ्रमरः भ्रमरी, मधुकरः मधुकरी, उरगः उरगी, सर्पः सर्पी। अबाधिता इत्येव तेन लूतामक्षिकाशिवानां नित्यस्त्रीत्वमेव। जातिभेदवाचिनः—मत्स्यः मत्सी, शकुलः शकुली। पुमाख्याः—कुम्भकारः स्त्रीयोगे कुम्भकारी (कुम्भकारस्य भार्या)।

अमरे केचित् शब्दा अपि द्विलिङ्गतया पठिताः। मल्लकः मल्लिका, शुनिः शुनी, वराटकः वराटिका, स्वातिः स्वाती, वर्णकः

वर्षिका, झाटलिः झाटली, मनुः मनावी-मनायी, सूषः सूषा, स्फाटिः स्फाटी, शठिः शठीः, कटिः कटी, कुटिः कुटी ।

इति स्त्रीपुंसलिङ्गानुशासनम् ।

पुंनपुंसकयोः । १ ।

अधिकारोऽयम् । इत ऊर्ध्वं वक्ष्यमाणाः पुंनपुंसकलिङ्गाः स्युः ।

घृतभूतमुस्तक्ष्वेलितैरावतपुस्तबुस्तलोहिताः । २ ।

एते शब्दाः पुंनपुंसकयोः स्युः । इदं घृतम्, अयं घृत इत्यादि । भूतशब्दस्य अतीते भवनकर्त्तरि च त्रिलिङ्गता । पिशाचे जन्तुमात्रे च पुंसि । पृथिव्यादिषु पञ्चसु क्लीवता, युक्ते यथार्थे नपुंसकतेति व्यवस्था । अमरेण तु "युक्ते क्ष्मादावृते भूतं प्राण्य-तीते समे त्रिषु" इत्युक्तम् । तथा च भूतशब्दस्य त्रिलिङ्गता-विषयभिन्ने एवास्य, सूत्रस्य विषयः । लोहितं लोहितः (रुधिरम्)

शृङ्गार्द्धनिदाघोद्यमशल्यदृढाः । ३ ।

एते पुंनपुंसकयोः स्युः । अयं शृङ्गः इदं शृङ्गम् । "अर्द्धं नपुंसकम्" (२,२,२,) सूत्रात् समांशवाचिनो नपुंसकता खण्ड-वाचिनस्तु पुंस्त्वमिति व्यवस्था । दृढशब्दस्य गुणवचनत्वे त्रिलिङ्गता विश्रब्धवाचित्वे एतत्सूत्रविषयता ।

व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्द्धर्चपुच्छाः । ४ ।

एते पुंनपुंसकलिङ्गाः स्युः । व्रजः व्रजम् । अर्द्धर्चः पुंसि

चेति (२,४,३१) सूत्रे अर्द्धर्चादीनां प्राप्तत्वेऽपि पुनरर्द्धर्चग्रहणं तद्गणपठितानां केषाञ्चित् वैदिकविषयत्वसूचनाय अत एव दूरु घृतादीनां केषाञ्चित् पाठो लौकिकप्रयोगेऽपि पुंनपुंसकतार्थः।

अर्द्धर्च गोमय कषाय कार्षापण कुतप कुणप कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म्म कर्म्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु प्रधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीय (पात्रीर) षष्टिक वारवाण प्रोथ कपित्थ शुष्क शाल शील शुल्क शीधु कवच रेणु ऋण करट शीकर मुसल सुवर्ण वर्ण पूर्व्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त बुस्त क्ष्वेडित शृङ्ग निगड खल मधु मूल मूलक स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक कर्पट शिखर कल्क नाट मस्तक वलय कुसुम तृण पङ्क कुण्डल किरीट कुमुद अर्व्वुद अङ्कुश तिमिर आश्रम भूषण इष्वास मुकुल वसन्त तडाग पिटक विटङ्क विडङ्ग पिण्याक माष कोश(ष) फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास विशाल चषाल खण्ड दर विटप रण बल मक मृणाल हस्त आर्द्र हल सूत्र ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल छल पुर राष्ट्र विम्ब अम्बर कुट्टिम कुक्कुट कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य बाल काल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन स्तन स्वर संगम निष्क क्षेम शूक छत्र पवित्र यौवन

कलह पालक मूषिक मण्डल वल्कल कुञ्ज विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमश तमाल लोह दण्डक शपथ प्रतिसर दारु धनुष् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल। अर्धर्चादिः।

अत एव "अर्धर्चादौ घृतादीनां पुंस्त्वार्थं वैदिकं ध्रुवम् तथोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत्" इत्यमरेणोक्तमतो यथोक्तविषयत्वमवगम्यते तत्र घृतादीनामिहोक्तेस्तेषां लौकिक-प्रयोगविषयत्वमपीति अमरोक्तं चिन्त्यमूलमिति भेदः।

कबन्धौषधायुधान्ताः। ५।

कबन्धः कबन्धम् औषधः औषधम् आयुधः आयुधम् अन्तः अन्तम्

दण्डमण्डखण्डशवसैन्धवपार्श्वकाशाङ्कुराकाशकुश-कुलिशाः। ६।

एते पुंनपुंसकयोः स्युः। दण्डः दण्डम्। "कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशस्थले" इत्युक्तार्थेषु पुमान् शलाकावाची तु स्त्रियां जानपदादित्वात् (४,१,४२) अयोविकारे ङीष्विधानात् कुशी। अयोविकारभिन्ने तु टाप् कुशा। अत एव "अतः कृकमीत्यादि (२,३,४८)सूत्रे कुशाकर्णीति, शारीरकसूत्रे च "हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दः" इति स्त्रीत्वप्रयोगः।

गृहमेहदेहपट्टपटहाष्टापदार्बुदककुदाश्च। ७।

एते उक्तलिङ्गाः स्युः। गृहं गृहः। मेहः मेहम् इत्यादि।

इति पुंनपुंसकलिङ्गानुशासनम्।

सूत्रकृता स्त्रीनपुंसकलिङ्गं विशिष्य नोक्तम् अमरसिंहेन तु सूत्रस्वरसात् तदवशिष्टतयाऽभिहितं तदिहाभिधीयते।

"स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ्"। इति भावकर्म्मणोर्विहितष्यञन्तस्य स्त्रीनपुंसकलिङ्गत्वं तच्च पूर्व्व-सूक्तमपि अवसरप्राप्ततया ज्ञानसौकर्य्यार्थमिह पुनरुच्यते। गुणवचनब्राह्मणादिभ्यः कर्म्मणि चेति चकारात् भावे विहितः ष्यञ् वुञ् च क्वचित् स्त्रीनपुंसकयोः स्यात्। उचितस्य भावः कर्म्म वा औचित्यं औचिती एवं चातुर्य्यं चातुरी माधुर्य्यं माधुरी। क्वचिदित्युक्तेः अर्हतो भावः आर्हन्तीत्येव तत्र-अर्हतो नुम् चेति नुम्। वुञ्, आहोपुरुषिका चौरिका शैष्यो-पाध्यायिका, गार्गिकया श्लाघते इति। क्वचित्युक्तेः रामणीयकं कामनीयकमित्यादौ "योपधाद्गुरूपोत्तमात्"(५,१,१३२) इति वुञन्तस्य क्लीवत्वमेव। भावकर्म्मणोरित्युक्तेः स्वार्थे ष्यञ् क्लीवे एव चातुर्वर्ण्यं त्रैलोक्यम्।

"षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः इति"

षष्ठीसमासनिष्पन्नाः सेनाद्यन्ताः स्त्रीनपुंसकलिङ्गाः स्युः। मनुष्यसेना मनुष्यसेनम्, वृक्षच्छाया वृक्षच्छायम्, यवसुरा यवसुरं, गोशाला गोशालम्, श्वनिशा श्वनिशम्।

"आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नस्य लुक्" इति च। आबन्तं अनन्तञ्च उत्तरपदं यस्य तादृशो द्विगुः स्त्रीनपुंसकयोः, तत्र च अनन्तस्य नस्य लुक् च। त्रिखट्वं त्रिखट्वी। त्रितक्षं त्रितक्षी। एतच्च पूर्व्वं प्रायेणोक्तम् प्रपञ्चार्थमिहोपन्यस्तम्।

स्त्रीनपुंसकलिङ्गानुशासनम्।

अविशिष्टलिङ्गम् । १ ।

नास्ति विशिष्टं लिङ्गं तत्कार्यञ्च यस्य । इत ऊर्द्धं वक्ष्यमाणाः शब्दा विशिष्टलिङ्गकार्यशून्याः विशिष्टलिङ्गशून्याश्च तेन त्रिलिङ्गाः स्युः ।

अव्ययडतियुष्मदस्मदः । २ ।

चादयोऽव्ययशब्दाः डतिप्रत्ययान्ता, युष्मदस्मच्छब्दौ च विशिष्टलिङ्गकार्यशून्याः स्युः । उच्चैः तरुः लता, मन्दिरं वा । कति पुरुषाः स्त्रियः कुलानि वा । त्वं पुमान् त्वं स्त्री त्वं कुलम् । अहं पुमान् स्त्री, कुलं वा ।

ष्णान्ता संख्या । ३ ।

षान्तनान्तसंख्यावाचकाः शब्दाः अविशिष्टलिङ्गकार्याः स्युः । पञ्च षट् पुरुषाः स्त्रियः कुलानि वा । ष्णान्तेति विशेषणात् शिष्टाः संख्याः त्रिलिङ्गाः विशिष्टलिङ्गकार्यवन्तः । एकः पुमान् एका स्त्री एकं कुलम् द्वौ द्वे द्वे । त्रयः तिस्रः त्रीणि वा ।

गुणवचनञ्च । ४

गुणवाचकाः शब्दाः गुणिपरत्वे त्रिलिङ्गाः स्युः । शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् । गुणपरत्वे तु यथाप्राप्तं शुक्ल इत्याद्येव अत एव "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इत्यमरः ।

कृत्याश्च । ५ ।

कृत्या इति बहुवचनं कृत्सामान्योपलक्षणं तच्चासति बाधके कर्त्राद्यर्थे त्रिलिङ्गाः स्युः । तथा च भावे विहितक्तिन्नादेः स्त्रीत्वस्य, घञादेश्च पुंस्त्वस्य विशिष्योक्तेस्तेनास्य बाधः । तत्र कर्त्रादि-

भव्यः गेयः पाठकः गायक इत्यादयः त्रिलिङ्गाः । कर्म्मणि-स्तोतव्यः स्तवनीयः स्तुत्य इत्यादयः । अत एव "क्तः कर्त्तर्य्य-संज्ञायां कृत्याः कर्म्मणि कर्त्तरि" इत्यमरोक्तिः । तत्र क्त-इत्यत्र उत्तरवाक्यस्थं कर्म्मणीति पदमाकृष्यते । तथा च कर्त्तरि कर्म्मणि च क्तः तत्तदर्थे कृत्याश्च त्रिलिङ्गाः स्युः ।

करणाधिकरणयोर्ल्युट् । ६ ।

करणे अधिकरणे च विहितल्युडन्तास्त्रिलिङ्गाः स्युः । ल्युडन्त-त्वेन क्लीवत्वे प्राप्ते त्रिलिङ्गतार्थं सूत्रम् । तत्र करणे—देव-यजनः, प्रमाणी, साधनम् प्रमाणम् । अधिकरणे पशुसंज्ञपनो यज्ञः इष्टौ स्त्री ङीप् । सत्रे नपुंसकम् ।

सर्व्वादीनि सर्व्वनामानि ।

सर्व्वविश्वेत्यादीनि सर्व्वनामसंज्ञकानि त्रिलिङ्गानि स्युः । सर्व्वः सर्व्वा सर्व्वम्, विश्वः विश्वा विश्वम् । युष्मदस्मदोस्तु सर्व्व-नामत्वेऽपि विशेषाभिधानात् न लिङ्गविशेषकार्य्यमिति भेदः ।

अमरवार्त्तिकाद्यनुसारेण अत्रेदमधिकमुच्यते ।

"परं लिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ।
अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्व्वाः परोपगाः ।
तद्धितार्थो द्विगुः संख्यासर्व्वनामतदन्तकाः ।
बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥

तत्र परवल्लिङ्गं "द्वन्द्वतत्पुरुषयोः" (२,४,२६ सू०) इति द्वन्द्वतत्पुरुषयोः उत्तरपदलिङ्गसमानलिङ्गत्वविधानेऽपि "स नपुं-सकम्" (२,४,२७ सू०) इति समाहारद्विगुद्वन्द्वयोर्नपुंसकत्वस्य

विधानात् स्वप्रधान इत्युक्तम्, समाहारे तु तयोः संघातस्यैव प्राधान्यात् न स्वघटकपदार्थप्राधान्यमिति न तत्र परवल्लिङ्गता । "अर्थेन सह नित्यसमासो विशेष्यलिङ्गता च" (२,१,२६ वा०) इति द्विजाय अयमियमिदं वेति विग्रहे द्विजार्थः विशेष्यलिङ्गः ।

कुगतिप्रादयः (२,२,१८) प्रादिभिर्नित्यसमासनिष्पन्नशब्दाः विशिष्टलिङ्गाः । तत्रत्यवार्तिकानि "प्रादयो गताद्यर्थे प्रथमया" (वा०) प्रगत आचार्य्यं प्राचार्य्यः प्रकृष्टा पितामही प्रपितामही प्रकृष्टं बलम् प्रबलम् सुबलमित्यादि । "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" (वा०) अतिक्रान्तः अतिक्रान्ता अतिक्रान्तं वा राजानम् अतिराजः अतिराजी अतिराजम् । परवल्लिङ्गतापवादः । एवमन्यत्राऽपि "अवादयः क्रुष्टाद्यर्थे तृतीयया" (वा०) अवक्रुष्टः कोकिलया अवकोकिलः अवकोकिला अवकोकिलम् । "पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्या" (वा०) परिग्लानोऽध्ययनाय पर्य्यध्ययनस्त्रिलिङ्गः । "निरादयः क्रान्ताद्यर्थे पञ्चम्या" (वा०) निष्क्रान्तो गृहात् इति विग्रहे निर्गृहः निर्गृहा निर्गृहम् । इति वार्तिकोक्तार्थविशेषे प्रादिसमासनिष्पन्ना अपि परगामिनस्त्रिलिङ्गाः । अलंपूर्व्वोऽपि त्रिलिङ्गः । अलं कर्म्मणे, अलंकर्म्मा त्रिलिङ्गः । "प्राप्तापन्ने च जीविकया" (२,२,४) इति विहितः प्राप्तापन्नपूर्व्वकजीविकान्तस्तत्पुरुषस्त्रिलिङ्गः । प्राप्तजीविकः प्राप्तजीविका प्राप्तजीविकम् एवम् आपन्नजीविकः । तद्धितार्थे द्विगुः, पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यादिस्त्रिलिङ्गः । संख्यासर्वनाम्नां त्रिलिङ्गत्वं स्वतन्त्रतैव पूर्व्वं दर्शितम् । तदन्तानाममरेऽधिकोक्तिः परित्यक्तुं शक्यते तत्पुरुषे द्वन्द्वे च परवल्लिङ्गतयैव त्रिलिङ्गताप्राप्तेः बहुव्रीहेस्त्रिलिङ्गत्वस्य अग्रे

वक्ष्यमाणत्वाच्च । "अनेकमन्यपदार्थे" २,२,२४ सू०) बहुव्रीहेरन्यपदार्थबोधकतया तल्लिङ्गत्वौचित्यात् "दिङ्नामान्यन्तराले" (२,२, २६ सू०) इति दिङ्नामवाचित्वात् स्त्रीत्वमेव न तु त्रिलिङ्गत्वम् । उत्तरपूर्व्वा । गुणद्रव्यादियोग उपाधिः शब्दप्रवृत्तौ निमित्तं येषां तादृशाः शब्दास्त्रिलिङ्गाः तत्र गुणवचनानां, "गुणवचनश्चेति" क्रियावचनानां च "कृत्याश्च" इत्यनेन सूत्रकृतैवोक्तम् द्रव्यसंबन्धोपाधिकास्त्रिलिङ्गाः इत्येवाधिकम् दण्डोऽस्यास्तीति इनिः दण्डी दण्डिनी दण्डि, धनवान् धनवती धनवत् इत्यादि ।

अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ।

इत्यमरोक्तिः "तेन रक्तं रागात्" (४,२,१) इति रक्ताद्यर्थे रञ्जनद्रव्यवाचिन उत्तरे विहिताणाद्यन्ताः त्रिलिङ्गाः स्युः । कषायेण रक्तमित्यणि काषायः पटः काषायी शाटी काषायं वस्त्रम् । आदिपदात् तदधिकारे "लाक्षारोचनाट्ठक्" (४,२,२,) इति ठगादयो गृह्यन्ते । लाक्षिकः रौचनिकस्त्रिलिङ्गः । रक्तादीत्यादिपदात् क्रियाविशेषकर्म्मणि तत्कर्तरि वा ये अणादयो विहिता ये च सम्बन्धार्थे विहितास्ते सर्व्वेऽपि गृह्यन्ते । "नक्षत्रेण युक्तः कालः" (४,२,३) इत्यण् पुष्येण युक्तं पौषं त्रिलिङ्गम् । "दृष्टं साम" (४,२,७) अण् वसिष्ठेन दृष्टं साम, वासिष्ठं साम वासिष्ठी ऋक् वासिष्ठो मन्त्रः "कलेर्ढक्" (४,२,८) कलिना दृष्टं कालेयम् । "वामदेवाड्ड्यड्ड्यौ" (४,२,९) वामदेव्यम् । "परिवृतो रथः" (४,२,१०) वस्त्रेण परिवृतो वास्त्रः । "तदधीते तद्वेद" (४,२,५९) व्याकरणमधीते वेद वा वैयाकरणः, इत्येवमध्ययनवेदनरूपक्रियादिकर्तरि विहितास्त्रिलिङ्गा एव "साम्य

देवता" (४,२,२४) इत्यादिना विहिताणादयः, पाशुपतम् वायव्यम् ऐन्द्रम् । "तदस्य पण्यम् (४,४,५१) अपूपं पण्यमस्य आपूपिक इत्यादयश्च ग्राह्याः ।

इति अविशिष्टलिङ्गत्रिलिङ्गानुशासनम् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यकृत विवृतिसहितम्
पाणिनीयं लिङ्गानुशासनं समाप्तम् ।